.. 18. svargArohaNaparva Kumbhaghonam Edition ..

॥ १८. स्वर्गारोहणपर्व ॥

स्वर्गारोहणपर्व - अध्याय ००१

॥ श्रीः ॥

१८.१. अध्यायः १

Mahabharata - SwargarohaNa Parva - Chapter Topics

स्वर्गं गतेन युधिष्ठिरेण तत्र महासमुच्छ्रयेण
शोभमानदुर्योधनदर्शनम् ॥ १ ॥
तथा तदुस्कर्षासहिष्णुतया तदीयदोषो द्घाटनेन तेन सह
स्वन स्वर्गवासानभिरोचननिवेदनपूर्वकं नारदंप्रति स्वस्य
भ्रात्रादिदिदृक्षानिवेदनम् ॥ २ ॥

Mahabharata - SwargarohaNa Parva - Chapter Text

श्रीवेदव्यासाय नमः ।
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १८-१-१ (९८४२८)
जनमेजय उवाच। १८-१-१क्ष् (८०९४)
स्वर्गं त्रिविष्टपं प्राप्य मम पूर्वपितामहाः ।
पाण्डवा धार्तराष्ट्राश्च कानि स्थानानि भेजिरे ॥ १८-१-१ (९८४२९)
एतदिच्छाम्यहं श्रोतुं सर्वविच्चासि मे मतः ।
महर्षिणाऽभ्यनुज्ञातो व्यासेनाद्भुतकर्मणा ॥ १८-१-२ (९८४३०)
वैशम्पायन उवाच। १८-१-३क्ष् (८०९५)
स्वर्गं त्रिविष्टपं प्राप्य तव पूर्वपितामहाः ।
युधिष्ठिरप्रभृतयो यदकुर्वत तच्छृणु ॥ १८-१-३ (९८४३१)
स्वर्गं त्रिविष्टपं प्राप्य धर्मराजो युधिष्ठिरः ।
दुर्योधनं श्रिया जुष्टं ददर्शासीनमासने ॥ १८-१-४ (९८४३२)
भ्राजमानमिवादित्यं वीरलक्ष्म्याऽभिसंवृतम् ।
देवैर्भ्राजिष्णुभिः साध्यैः सहितं पुण्यकर्मभिः ॥ १८-१-५ (९८४३३)
ततो युधिष्ठिरो राजा दुर्योधनममर्षितः ।
सहसा सन्निवृत्तोऽभूच्छ्रियं दृष्ट्वा सुयोधने ॥ १८-१-६ (९८४३४)

ब्रुवन्नुच्चैर्वचस्तान्वै नाहं दुर्योधनेन वै ।
सहितः कामये लोकाँल्लब्धेनादीर्घदर्शिना ॥ १८-१-७ (९८४३५)
यत्कृते पृथिवी सर्वा सुहृदो बान्धवास्तथा ।
हतास्माभिः प्रसह्याजौ क्लिष्टैः पूर्वं महावने ॥ १८-१-८ (९८४३६)
द्रौपदी च सभामध्ये पाञ्चाली धर्मचारिणी ।
पर्याकृष्टाऽनवद्याङ्गी पत्नी नो गुरुसन्निधौ ॥ १८-१-९ (९८४३७)
अस्ति देवा न मे कामः सुयोधनमुदीक्षितुम् ।
तत्राहं गन्तुमिच्छामि यत्र ते भ्रातरो मम ॥ १८-१-१० (९८४३८)
नैवमित्यब्रवीत्तं तु नारदः प्रहसन्निव ।
स्वर्गे निवासे राजेन्द्र विरुद्धं चापि नश्यति ॥ १८-१-११ (९८४३९)
युधिष्ठिर महाबाहो मैवं वोचः कथञ्चन ।
दुर्योधनं प्रति नृपं शृणु चेदं वचो मम ॥ १८-१-१२ (९८४४०)
एष दुर्योधनो राजा पूज्यते त्रिदशैः सह ।
सद्भिश्च राजप्रवरैते इमे स्वर्गवासिनः। १८-१-१३ (९८४४१)
वीरलोकगतिं प्राप्ता युद्धे हुत्वाऽऽत्मनस्तनुम् ।
यूयं सर्वे सुरसमा येन युद्धेन बाधिताः ॥ १८-१-१४ (९८४४२)
स एष क्षत्रधर्मेण स्थानमेतदवाप्तवान् ।
भये महति योऽभीतो बभूव पृथिवीपतिः ॥ १८-१-१५ (९८४४३)
न तन्मनसि कर्तव्यं पुत्र यद्द्यूतकारितम् ।
द्रौपद्याश्च परिक्लेशं न चिन्तयितुमर्हसि ॥ १८-१-१६ (९८४४४)
ये चान्येऽपि परिक्लेशा युष्माकं ज्ञातिकारिताः ।
संग्रामेष्वथवाऽन्यत्र न तान्संस्मर्तुमर्हसि ॥ १८-१-१७ (९८४४५)
समागच्छ यथान्यायं राज्ञा दुर्योधनेन वै ।
स्वर्गोऽयं नेह वैराणि भन्ति मनुजाधिप ॥ १८-१-१८ (९८४४६)
नारदेनैवमुक्तस्तु कुरुराजो युधिष्ठिरः ।
भ्रातॄन्पप्रच्छ मेधावी वाक्यमेतदुवाच ह ॥ १८-१-१९ (९८४४७)
यदि दुर्योधनस्यैते वीरलोकाः सनातनाः ।
अधर्मज्ञस्य पापस्य पृथिवीसुहृदद्रुहः ॥ १८-१-२० (९८४४८)
यत्कृते पृथिवी नष्टा सहसा सनरद्विपा ।
वयं च मन्युना दग्धा वैरं प्रतिचिकीर्षवः ॥ १८-१-२१ (९८४४९)
ये ते वीरी महात्मानो भ्रातरो मे महाव्रताः ।
सत्यप्रतिज्ञा लोकस्य शूरा वै सत्यवादिनः ।
तेषामिदानीं के लोका द्रष्टुमिच्छामि तानहम् ॥ १८-१-२२ (९८४५०)
कर्णं चैव महात्मानं कौन्तेयं सत्यसङ्गरम् ।
धृष्टद्युम्नं सात्यकिं च धृष्टद्युम्नस्य चात्मजान् ॥ १८-१-२३ (९८४५१)
ये च शस्त्रैर्वधं प्राप्ताः क्षत्रधर्मेण पार्थिवाः ।

क्वनु ते पार्थिवान्ब्रह्मन्नैतान्पश्यामि नारद ॥१८-१-२४ (९८४५२)
विराटद्रुपदौ चैव धृष्टकेतुमुखांश्च तान् ।
शिखण्डिनं च पाञ्चाल्यं द्रौपदेयांश्च सर्वशः ।
अभिमन्युं च दुर्धर्षं द्रष्टुमिच्छामि नारद ॥ ॥ १८-१-२५ (९८४५३)

इति श्रीमन्महाभारते स्वर्गारोहणपर्वणि प्रथमोऽध्यायः ॥१ ॥
Mahabharata - SwargarohaNa Parva - Chapter Footnotes

७-१-१ त्रीणि विष्टपानि भुवनानि फलोत्कर्षवशाद्यत्रान्तर्भवन्ति
तादृशं स्वर्गं प्राप्य ॥
७-१-६ तत इति ।स्वर्गेऽप्यमर्षो दुस्त्यज इति संस्काराणां प्राबल्यमुक्तम् ॥
७-१-९ हताः अस्माभिः संधिरार्षः ॥
७-१-११ विरुद्धं वैरादिकं नश्यति अन्तर्धीयते ॥
७-१-२० सुहृद इत्यदन्तः शब्दः ॥

स्वर्गारोहणपर्व - अध्याय ००२
॥ श्रीः ॥
१८.२. अध्यायः २

Mahabharata - SwargarohaNa Parva - Chapter Topics
स्वर्गे कर्णादिबन्धुजनानपश्यता युधिष्ठिरेण देवान्प्रति यत्र
कुत्रापि बन्धुजनैः सहैव स्वस्य निवासेच्छानिवेदनम् ॥१ ॥
देवैर्युधिष्ठिराय बन्धुजनप्रदर्शनं चोदितेन देवदूतेन तस्य
नरकप्रदेशप्रापणम् ॥२ ॥
दुर्दर्शनरकदर्शनासहिष्णुतया सह दूतेन प्रतिनिवर्तमानेन
युधिष्ठिरेण श्रुतपूर्वकण्ठध्वनिश्रवणम् ॥३ ॥
ततो युधिष्ठिरपृष्टैस्तैस्तं प्रित स्वेषां कर्मभीमादित्वकथनम् ॥४ ॥
ततस्तेन दूतंप्रति इन्द्रे स्वस्य तत्समीपं प्रत्यनागमनचोदना ॥५ ॥
दूतेनेन्द्रे युधिष्ठिरचिकीर्षितनिवेदनम् ॥६ ॥

Mahabharata - SwargarohaNa Parva - Chapter Text

युधिष्ठिर उवाच ।
नेह पश्यामि विबुधा राधेयममितौजसम् ।
भ्रातरौ च महात्मानौ युधामन्यूत्तमौजसौ ॥१८-२-१ (९८४५४)
जुहुवुर्ये शरीराणि रणवह्नौ महारथाः ।

राजानो राजपुत्राश्च ये मदर्थे हता रणे ॥ १८-२-२ (९८४५५)
क्व ते महारथाः सर्वे शार्दूलसमविक्रमाः ।
तैरप्ययं जितो लोकः कच्चित्पुरुषसत्तमैः ॥ १८-२-३ (९८४५६)
यदि लोकानिमान्प्राप्तास्ते च सर्वे महारथाः ।
स्थितं वित्त हि मां देवाः सहितं तैर्महात्मभिः ॥ १८-२-४ (९८४५७)
कच्चिन्न तैरवाप्तोऽयं नृपैर्लोकोऽक्षयः शुभः ।
न तैरहं विना वत्स्ये भ्रातृभिर्ज्ञातिभिस्तथा ॥ १८-२-५ (९८४५८)
मातुर्हि वचनं श्रुत्वा तदा सलिलकर्मणि ।
कर्णस्य क्रियतां तोयमिति तप्यामि तेन वै ॥ १८-२-६ (९८४५९)
इदं च परितप्यामि पुनःपुनरहं सुराः ।
यन्मातुः सदृशौ पादौ तस्याहममितात्मनः ॥ १८-२-७ (९८४६०)
दृष्ट्वैव तं नानुगतः कर्णं परबलार्दनम् ।
न ह्यस्मान्कर्णसहिताञ्जयेच्छक्रोऽपि संयुगे ॥ १८-२-८ (९८४६१)
तमहं यत्रतत्रस्थं द्रष्टुमिच्छामि सूर्यजम् ।
अविज्ञातो मया योसौ घातितः सव्यसाचिना ॥ १८-२-९ (९८४६२)
भीमं च भीमविक्रान्तं प्राणेभ्योऽपि प्रियं मम ।
अर्जुनं चेन्द्रसंकाशं यमौ चैव यमोपमौ ॥ १८-२-१० (९८४६३)
द्रष्टुमिच्छामि तां चाहं पाञ्चालीं धर्मचारिणीम् ।
न चेह स्थातुमिच्छामि सत्यमेवं ब्रवीमि वः ॥ १८-२-११ (९८४६४)
किं मे भ्रातृविहीनस्य स्वर्गेण सुरसत्तमाः ।
यत्र ते मम स स्वर्गो नायं स्वर्गो मतो मम ॥ १८-२-१२ (९८४६५)
देवा ऊचुः। १८-२-१३क्ष् (८०९६)
यदि वै तत्र ते श्रद्धा गम्यतां तत्र माचिरम् ।
प्रिये हि तव वर्तामो देवराजस्य शासनात् ॥ १८-२-१३ (९८४६६)
वैशम्पायन उवाच। १८-२-१४क्ष् (८०९७)
इत्युक्त्वा तं ततो देवा देवदूतमुपादिशन् ।
युधिष्ठिरस्य सुहृदो दर्शयेतदि परंतप ॥ १८-२-१४ (९८४६७)
ततः कुन्तीसुतो राजा देवदूतश्च जग्मतुः ।
सहितौ राजशार्दूल यत्र ते पुरुषर्षभाः ॥ १८-२-१५ (९८४६८)
अग्रतो देवदूतश्च ययौ राजा च पृष्ठतः ।
पन्थानमशुभं दुर्गं सेवितं पापकर्मभिः ॥ १८-२-१६ (९८४६९)
तमसा संवृतं घोरं केशशैवलशाद्वलम् ।
युक्तं पापकृतां गन्धैर्मांसशोणितकर्दमम् ॥ १८-२-१७ (९८४७०)
दंशोत्पातकभल्लूकमक्षिकामशकावृतम् ।
इतश्चेतश्च कुणपैः समन्तात्परिवारितम् ॥ १८-२-१८ (९८४७१)
अस्थिकेशसमाकीर्णं कृमिकीटसमाकुलम् ।

ज्वलनेन प्रदीप्तेन समन्तात्परिवेष्टितम् ॥ १८-२-१९ (९८४७२)
अयोमुखैश्च काकाद्यैर्गृध्रैश्च समभिद्रुतम् ।
सूचीमुखैस्तथा प्रेतैर्विन्ध्यशैलोपमैर्वृतम् ॥ १८-२-२० (९८४७३)
मेदोरुधिरयुक्तैश्च च्छिन्नबाहूरुपाणिभिः ।
निकृत्तोदरपदैश्च तत्रतत्र प्रवेशितैः ॥ १८-२-२१ (९८४७४)
स तत्कुणपदुर्गन्धमशिवं रोमहर्षणम् ।
जगाम राजा धर्मान्मा मध्ये बहु विचिन्तयन् ॥ १८-२-२२ (९८४७५)
ददर्शोष्णोदकैः पूर्णां नदीं चापि सुदुर्गमाम् ।
असिपत्रवनं चैव निशितं क्षुरसंवृतम् ॥ १८-२-२३ (९८४७६)
करम्भवालुकास्तप्ता आयसीश्चि शिलाः पृथक् ।
लोहकुंभीश्च तैलस्य क्वाथ्यमानाः समन्ततः ॥ १८-२-२४ (९८४७७)
कूटशाल्मलिकं तापि दुःस्पर्शं तीक्ष्णकण्टकम् ।
ददर्शान्याश्च कौन्तेयो यातनाः पापकर्मिणाम् ॥ १८-२-२५ (९८४७८)
स तं दुर्गन्धमालक्ष्य देवदूतमुवाच ह ।
कियदध्वानमस्माभिर्गन्तव्यमिममीदृशम् ॥ १८-२-२६ (९८४७९)
क्व च ते भ्रातरो मह्यं तन्ममाख्यातुमर्हसि ।
देशोऽयं कश्च देवानामेतदिच्छामि वेदितुम् ॥ १८-२-२७ (९८४८०)
स संनिववृते श्रुत्वा धर्मराजस्य भाषितम् ।
देवदूतोऽब्रवीचैनमेतावद्गमनं तव ॥ १८-२-२८ (९८४८१)
निवर्तितव्यो हि मया तताऽस्म्युक्तो दिवौकसैः ।
यदि श्रान्तोसि राजेन्द्रि त्वमथागन्तुमर्हसि ॥ १८-२-२९ (९८४८२)
युधिष्ठिरस्तु निर्विण्णस्तेनि गन्धेन मूर्छितः ।
निवर्तने धृतमनाः पर्यावर्तत भारत ॥ १८-२-३० (९८४८३)
सं संनिवृत्तो धर्मात्मा दुःखशोकसमाहतः ।
शुश्राव तत्र वदतां दीना वाचः समन्ततः ॥ १८-२-३१ (९८४८४)
भोभो धर्मज राजर्षे पुण्याभिजन पाण्वन ।
अनुग्रहार्थमस्माकं तिष्ठ तावन्मुहूर्तकम् ॥ १८-२-३२ (९८४८५)
आयाति त्वयि दुर्धर्षे वाति पुण्यः समीरणः ।
तव गन्धानुगस्तात येनास्मान्सुखमागमत् ॥ १८-२-३३ (९८४८६)
ते वयं पार्थ दीर्घस्य कालस्य पुरुषर्षभ ।
सुखमासादयिष्यामस्त्वां दृष्ट्वा राजसत्तम ॥ १८-२-३४ (९८४८७)
संतिष्ठस्व महाबाहो मुहूर्तमिह भारत ।
त्वयि तिष्ठति कौरव्य यातनाऽस्मान्न बाधते ॥ १८-२-३५ (९८४८८)
एवं बहुविधा वाचः कृपणा वेदनावताम् ।
तस्मिन्देशे स शुश्राव समन्ताद्वदतां नृप ॥ १८-२-३६ (९८४८९)
तेषां तु वचनं श्रुत्वा दयावान्दीनभाषिणाम् ।

अहो कृच्छ्रमिति प्राह तस्थौ स च युधिष्ठिरः ॥ १८-२-३७ (९८४९०)
स ता गिरः पुरस्ताद्वै श्रुतपूर्वाः पुनःपुनः ।
ग्लानानां दुःखितानां च नाभ्यजानत पाण्डवः ॥ १८-२-३८ (९८४९१)
अबुध्यमानस्ता वाचो धर्मपुत्रो युधिष्ठिरः ।
उवाच के भवन्तो वै किमर्थमिह तिष्ठथ ॥ १८-२-३९ (९८४९२)
इत्युक्तास्ते ततः सर्वे समन्तादवभाषिरे ।
कर्णोऽहं भीमसेनोऽहमर्जुनोऽहमिति प्रभो ॥ १८-२-४० (९८४९३)
नकुलः सहदेवोऽहं धृष्टद्युम्नोऽहमित्युत ।
द्रौप्दी द्रौपदेयाश्चि इत्येवं ते विचुक्रुशुः ॥ १८-२-४१ (९८४९४)
ता वाचः स तदा श्रुत्वा तद्देशसदृशीर्नृप ।
ततो विममृशे राजा किंत्विदं दैवकारितम् ॥ १८-२-४२ (९८४९५)
किन्तु तत्कलुषं कर्म कृतमेभिर्महात्मभिः ।
कर्णेन द्रौपदेयैर्वा पाञ्चाल्या वा सुमध्यया ॥ १८-२-४३ (९८४९६)
य इमे पापगन्धेऽस्मिन्देशे सन्ति सुदारुणे ।
नाहं जानामि सर्वेषां दुष्कृतं पुण्यकर्मणाम् ॥ १८-२-४४ (९८४९७)
किं कृत्वा धृतराष्ट्रस्य पुत्रो राजा सुयोधनः ।
तथा श्रिया युतः पापैः सहसर्वैः पदानुगैः ॥ १८-२-४५ (९८४९८)
महेन्द्रि इव लक्ष्मीवानास्ते परमपूजितः ।
कस्येदानीं विकारोऽयं य इमे नरकं गताः ॥ १८-२-४६ (९८४९९)
सर्वे धर्मविदः शूराः सत्यागमपरायणाः ।
क्षत्रधर्मरताः सन्तो यज्वानो भूरिदक्षिणाः ॥ १८-२-४७ (९८५००)
किंनु सुप्तोस्मि जागर्मि चेतयामि न चेतये ।
अहो चित्तविकारोऽयं स्याद्वा मे चित्तविभ्रमः ॥ १८-२-४८ (९८५०१)
एवं बहुविधं राजा विममर्श युधिष्ठिरः ।
दुःखशोकसमाविष्टश्चिन्ताव्याकुलितेन्द्रियः ॥ १८-२-४९ (९८५०२)
क्रोधमाहारयच्चैव तीव्रं धर्मसुतो नृपः ।
देवांश्च गर्हयामास धर्मं चैव युधिष्ठिरः ॥ १८-२-५० (९८५०३)
स तीव्रशोकसंतप्तो देवदूतमुवाच ह ।
गम्यतां तत्र येषां त्वं दूतस्तेषामुपान्तिकम् ॥ १८-२-५१ (९८५०४)
न ह्यहं तत्र यास्यामि स्थितोस्मीति निवेद्यताम् ।
मत्संश्रयादिमे दूनाः सुखिनो भ्रातरो हि मे ॥ १८-२-५२ (९८५०५)
इत्युक्तः स तदा दूतः पाण्डुपुत्रेण धीमता ।
जगामि तत्र यत्रास्ते देवराजः शतक्रतुःठ ॥ १८-२-५३ (९८५०६)
निवेदयामास च तद्धर्मराजचिकीर्षितम् ।
यथोक्तं धर्मपुत्रेण सर्वमेव जनाधिप ॥ ॥ १८-२-५४ (९८५०७)

इति श्रीमन्महाभारते स्वर्गारोहणपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
Mahabharata - SwargarohaNa Parva - Chapter Footnotes

७-२-२४ करंभवालुकाः श्वेतसूक्ष्मवालुका भ्राष्ट्रवालुका इत्यर्थः ॥
७-२-४९ विममर्श विचारं कृतवान् ॥
७-२-५२ दूनाः खिन्नाः ॥

स्वर्गारोहणपर्व - अध्याय ००३
॥ श्रीः ॥
१८.३. अध्यायः ३

Mahabharata - SwargarohaNa Parva - Chapter Topics
तत्रैवावस्थानपरीक्षया परितुष्टेषु यमेन्द्रादिषु
युधिष्ठिरसमीपमुपागतेषु तद्दृष्टपूर्वनरकादीनां
क्षणेनान्तर्धानम् ॥ १ ॥
धर्मेण युधिष्ठिरंप्रति सप्रशंसनं तद्दृष्टनरकस्य
परीक्षणायेन्द्रमायासृष्टत्वकथनम्। २ ।।
ततो युधिष्ठिरेण गङ्गायामवागाहनान्मानुषशरीरपरित्यागपूर्वकं
दिव्यशरीरपरिग्रहणेन महर्ष्यादिभिः स्तूयमानेन सता
सहदेवैर्भ्रात्राद्यधिष्ठितदिव्यस्थानगमनम् ॥ ३ ॥

Mahabharata - SwargarohaNa Parva - Chapter Text

वैशम्पायन उवाच ।
स्थिते मुहूर्तं पार्थे तु धर्मराजे युधिष्ठिरे ।
आजग्मुस्तत्र कौरव्यं देवाः शक्रपुरोगमाः ॥ १८-३-१ (९८५०८)
स च विग्रहवान्धर्मो राजानं संपरीक्ष्य तम् ।
तत्राजगाम यत्रासौ कुरुराजो युधिष्ठिरः ॥ १८-३-२ (९८५०९)
तेषु भासुरदेहेषु पुण्याभिजनकर्मसु ।
समागतेषु देवेषु व्यगमत्तत्तमो नृप ॥ १८-३-३ (९८५१०)
नादृश्यन्त च तास्तत्र यातनाः पापकर्मणाम् ।
नदी वैतरणी चैव कूटशाल्मलिना सह ॥ १८-३-४ (९८५११)
लोहकुंभ्यः शिलाश्चैव नादृश्यन्त भयानकाः ।
विकृतानि शरीराणि यानि तत्र समन्ततः ॥ १८-३-५ (९८५१२)
ददर्श राजा कौरव्यस्तान्सर्वान्सुमहाप्रभान् ॥ १८-३-६ (९८५१३)
ततो वायुः सुखस्पर्शः पुण्यगन्धवहः शुचिः ।

ववौ देवसमीपस्थः शीतलोऽतीव भारत ॥ १८-३-७ (९८५१४)
मरुतः सह शक्रेण वसवश्चाश्विनौ सह ।
साध्या रुद्रास्तथाऽऽदित्या ये चान्येऽपिदिवौकसः। १८-३-८ (९८५१५)
सर्वे तत्र समाजग्मुः सिद्धाश्च परमर्षयः ।
यत्र राजा महातेजा धर्मपुत्रः स्थितोऽभवत् ॥ १८-३-९ (९८५१६)
ततः शक्रः सुरपतिः श्रिया परमया युतः ।
युधिष्ठिरमुवाचेदं सान्त्वपूर्वमिदं वचः ॥ १८-३-१० (९८५१७)
युधिष्ठिर महाबाहो प्रीता देवगणास्त्वया ।
एह्येहि पुरुषव्याघ्र कृतमेतावता विभो ॥ १८-३-११ (९८५१८)
सिद्धिः प्राप्ता महाबाहो लोकाश्चाप्यक्षयास्तव ।
भ्रातॄणां सुहृदां चैव गतिर्निर्त्या सुपूजिता ॥ १८-३-१२ (९८५१९)
न च मन्युस्त्वया कार्यः शृणु चेदं वचो मम ।
अवश्यं नरकस्तात द्रष्टव्यः सर्वराजभिः ॥ १८-३-१३ (९८५२०)
शुभानामनशुभानां च द्वौ राशी पुरुषर्षभ ।
यः पूर्वं सुकृतं भुङ्क्ते पश्चान्निरयमेति सः ॥ १८-३-१४ (९८५२१)
पूर्वं नरकभाग्यस्तु पश्चात्स्वर्गमुपैति सः ।
भूयिष्ठं पापकर्मा यः स पूर्वं स्वर्गमश्नुते ॥ १८-३-१५ (९८५२२)
ग्भूयिष्ठशुभकर्मा त्वमल्पजिह्मतयाऽच्युत।'
तेन त्वमेवं गमितो मया श्रेयोर्थिना नृप ॥ १८-३-१६ (९८५२३)
व्याजेन हि त्वया द्रोण उपचीर्णः सुतं प्रति ।
व्याजेनैव ततो राजन्दर्शितो नरकस्तव ॥ १८-३-१७ (९८५२४)
यथैव त्वं तथा भीमस्तथा पार्थो यमौ तथा ।
द्रौपदी च तथा कृष्णा व्याजेन नरकं गताः ।
आगच्छ नरशार्दूल मुक्तास्ते चैव कल्मषात् ॥ १८-३-१८ (९८५२५)
स्वपक्ष्याश्चैव ये तुभ्यं पार्थिवा निहता रणे ।
सर्वे स्वर्गमनुप्राप्तास्तान्पश्य भरतर्षभ ॥ १८-३-१९ (९८५२६)
कर्णश्चैव महेष्वासः सर्वशस्त्रभृतांवरः ।
स गतः परमां सिद्धिं यदर्थं परितप्यसे ॥ १८-३-२० (९८५२७)
तं पश्य पुरुषव्याघ्रमादित्यतनयं विभो ।
स्वस्थानस्थं महाबाहो जहि शोकं नरर्षभ ॥ १८-३-२१ (९८५२८)
भ्रातॄन्पुत्रांस्तथा पश्य स्वपक्ष्यांश्चैव पार्थिवान् ।
स्वंस्वं स्थानमनुप्राप्तान्व्येतु ते मानसो ज्वरः ॥ १८-३-२२ (९८५२९)
कृच्छ्रं पूर्वं चानुभूय इतःप्रभृति कौरव ।
विहारस्व मया सार्धं गतशोको निरामयः ॥ १८-३-२३ (९८५३०)
कर्मणां तात पुण्यानां ज्ञानानां तपसां स्वयम् ।
दानानां च महाबाहो फलं प्राप्नुहि पार्थिवः ॥ १८-३-२४ (९८५३१)

अद्य त्वां देवगन्दर्वा दिव्याश्चाप्सरसो दिवि ।
उपसेवन्तु कल्याणं विरजंबरभूषणाः ॥ १८-३-२५ (९८५३२)
राजसूयजितां लोकानश्वमेधभिनिर्मितान् ।
प्राप्नुहि त्वं महाबाहो तपसश्च महाफलम् ॥ १८-३-२६ (९८५३३)
उपर्युपरि राज्ञां हि तव लोकाः युधिष्ठिर ।
हरिश्चन्द्रमसः पार्थ येषु त्वं विहरिष्यसि ॥ १८-३-२७ (९८५३४)
मान्धाता यत्र राजर्षिर्यत्र राजा भगीरथः ।
दौष्यन्तिर्यत्र भरतस्तत्र त्वं विहरिष्यसि ॥ १८-३-२८ (९८५३५)
एषा देवनदी पुण्या पार्थ त्रैलोक्यपावनी ।
आकाशगङ्गा राजेन्र्र तत्राप्लुत्य गमिष्यसि ॥ १८-३-२९ (९८५३६)
अत्र स्नातस्य भावस्ते मानुषो विगमिष्यति ।
गतशोको निरायासो मुक्तवैरो भविष्यसि ॥ १८-३-३० (९८५३७)
एवं ब्रुवति देवेन्द्रे कौरवेन्द्रं युधिष्ठिरम् ।
धर्मो विग्रहवान्साक्षादुवाच सुतमात्मनः ॥ १८-३-३१ (९८५३८)
भोभो राजन्महाप्राज्ञ प्रीतोस्मि तव पुत्रक ।
मद्भक्त्या सत्यवाक्यैश्च क्षमया च दमेन च ॥ १८-३-३२ (९८५३९)
एषा तृतीया जिज्ञासा तव राजन्कृता मया ।
न शक्यसे चालयितुं स्वभावात्पार्थ हेतुतः ॥ १८-३-३३ (९८५४०)
पूर्वं परीक्षितो हि त्वं प्रश्नाद्द्वैतवने मया ।
अरणीसहितस्यार्थे तच्च निस्तीर्णवानसि ॥ १८-३-३४ (९८५४१)
सोदर्येषु विनष्टेषु द्रौपद्या तत्र भारत ।
श्वरूपधारिणा तत्र पुनस्त्वं मे परीक्षितः ॥ १८-३-३५ (९८५४२)
इदं तृतीयं भ्रातॄणामर्थे यतस्थातुमिच्छसि ।
विशुद्धोसि महाभाग सुखी विगतकल्मषः ॥ १८-३-३६ (९८५४३)
न च ते भ्रातरः पार्थ नरकार्हा विशांपते ।
मायैषा देवराजेन महेन्द्रेणि प्रयोजिता ॥ १८-३-३७ (९८५४४)
अवश्यं नरकास्तात द्रष्टव्याः सर्वराजभिः ।
ततस्त्वया प्राप्तमिदं मुहूर्तं दुःखमुत्तमम् ॥ १८-३-३८ (९८५४५)
न सव्यसाची भीमो वा यमौ वा पुरुषर्षभौ ।
कर्णो वा सत्यवाक् शूरो नरकार्हाश्चिरं नृप ॥ १८-३-३९ (९८५४६)
न कृष्णा राजपुत्री च नरकार्हा कथञ्चन ।
एह्येहि भरतश्रेष्ठ पश्य चेमांस्त्रिलोकगान् ॥ १८-३-४० (९८५४७)
वैशम्पायन उवाच। १८-३-४१क्ष् (८०९८)
एवमुक्तः स राजर्षिस्तव पूर्वपितामहः ।
जगाम सह धर्मेणि सवैश्च त्रिदिवालयैः ॥ १८-३-४१ (९८५४८)
गङ्गां देवनदीं पुण्यां पावनीमृषिसंस्तुताम् ।

अवगाह्य ततो राजा तनुं तत्याज मानुषीम् ॥१८-३-४२ (९८५४९)
ततो विव्यवपुर्भूत्वा धर्मराजो युधिष्ठिरः ।
निर्वैरो गतसंतापो जले तस्मिन्समाप्लुतः ॥१८-३-४३ (९८५५०)
ततो ययौ वृतो देवैः कुरुराजो युधिष्ठिरः ।
धर्मेण सहितो धीमांस्तूयमानो महर्षिभिः ॥१८-३-४४ (९८५५१)
यत्र ते पुरुषव्याघ्राः शूरा विगतमन्यवः ।
पाण्डवा धार्तराष्ट्राश्च स्वानि स्थानानि भेजिरे ॥ ॥१८-३-४५ (९८५५२)

इति श्रीमन्महाभारते स्वर्गारोहणपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
Mahabharata - SwargarohaNa Parva - Chapter Footnotes

७-३-१७ हतः कुञ्जर इति अस्वत्थामवधे द्रोण उपचीर्णो वञ्चितः
गजवाचीशब्दो मनुष्यपरत्वेन ज्ञापित इत्युपचारच्छलेनेत्यर्थः ॥
७-३-१९ तुभ्यं तव ॥
७-३-३३ जिज्ञासा परीक्षा ॥
७-३-३५ स्वर्गाधिरोहणे द्रौपद्या सह सोदर्येषु विनष्टेयु सत्सु
। श्वरूपदारिणा शुनकरूपिणा ॥
७-३-४४ यत्र ते पाण्डवास्तत्र देवैः सह ययाविति द्वयो सम्बन्धः ॥

स्वर्गारोहणपर्व - अध्याय ००४
॥ श्रीः ॥
१८.४. अध्यायः ४

Mahabharata - SwargarohaNa Parva - Chapter Topics
युधिष्ठिरेण स्वर्गे निवसतां कृष्णकर्णादीनां दर्शनम् ॥ १ ॥
इन्द्रेण युधिष्ठिराय द्रौपदेयादीनां तत्तत्स्थानगतानां
पृथक्पृथक्प्रदरशनम् ॥ २ ॥

Mahabharata - SwargarohaNa Parva - Chapter Text

वैशम्पायन उवाच
ततो युधिष्ठिरो राजा देवैः सर्षिमरुद्गणैः ।
स्तूयमानो ययौ तत्र यत्र ते कुरुपुङ्गवाः ॥१८-४-१ (९८५५३)
ददर्श तत्र गोविन्दं ब्राह्मेण वपुषाऽन्वितम् ।
तेनैव दृष्टपूर्वेण सादृश्येनैव सूचितम् ॥१८-४-२ (९८५५४)
दीप्यमानं स्ववपुषा दिव्यैरस्त्रैरुपस्थितम् ।

चक्रप्रभृतिभिर्घोरैर्दिव्यैः पुरुषविग्रहैः ॥ १८-४-३ (९८५५५)
उपास्यमानं वीरेण फल्गुनेन सुवर्चसा ।
तथास्वरूपं कौन्तेयो ददर्श मधुसूदनम् ॥ १८-४-४ (९८५५६)
तावुभौ पुरुषव्याघ्रौ समुद्वीक्ष्य युधिष्ठिरम् ।
यथावत्प्रतिपेदाते पूजया देवपूजितौ ॥ १८-४-५ (९८५५७)
अपरस्मिन्नथोद्देशे कर्णं शस्त्रभृतां वरम् ।
द्वादशादित्यसहितं ददर्श कुरुनन्दनः ॥ १८-४-६ (९८५५८)
अथापरस्मिन्नुद्देशे मरुद्गणवृतं विभुम् ।
भीमसेनमथापश्यत्तेनैव वपुषाऽन्वितम् ॥ १८-४-७ (९८५५९)
वायोर्मूर्तिमतः पार्श्वे दिव्यमूर्तिसमन्वितम् ।
श्रिया परमया युक्तं सिद्धिं परमिकां गतम् ॥ १८-४-८ (९८५६०)
अश्विनोस्तु तथा स्थाने दीप्यमानौ स्वतेजसा ।
नकुलं सहदेवं च ददर्श कुरुनन्दनः ॥ १८-४-९ (९८५६१)
तथा ददर्श पाञ्चालीं कमलोत्पलमालिनीम् ।
वपुषा स्वर्गमाक्रम्य तिष्ठन्तीमर्कवर्चसम् ॥ १८-४-१० (९८५६२)
तत्रैनां सहसा राजा स्प्रष्टुमैच्छद्युधिष्ठिरः ।
ततोऽस्य भगवानिन्द्रः कथयामास देवराट् ॥ १८-४-११ (९८५६३)
श्रीरेषा द्रौपदीरूपा त्वदर्थे मानुषं गता ।
अयोनिजा लोककान्ता पुण्यगन्धा युधिष्ठिर ॥ १८-४-१२ (९८५६४)
रत्यर्थं भवतां ह्येषा निर्मिता शूलपाणिना ।
द्रुपदस्य कुले जाता भवद्भिश्चोपजीविता ॥ १८-४-१३ (९८५६५)
एते पञ्च महाभागा गन्धर्वाः पावकप्रभाः ।
द्रौपद्यास्तनया राजन्युष्माकममितौजसः ॥ १८-४-१४ (९८५६६)
पश्य गन्धर्वराजानं धृतराष्ट्रं मनीषिणम् ।
एनं च त्वं विजानीहि भ्रातरं पूर्वजं पितुः ॥ १८-४-१५ (९८५६७)
अयं ते पूर्वजो भ्राता कौन्तेयः पावकद्युतिः ।
सूर्यपुत्रो रथिश्रेष्ठो राधेय इति विश्रुतः ।
आदित्यसहितो भाति पश्यैनं पुरुषर्षभम् ॥ १८-४-१६ (९८५६८)
साध्यानामथ देवानां विश्वेषां मरुतामपि ।
गणेषु पश्य राजेन्द्र वृष्ण्यन्धकमहारथान् ।
सात्यकिप्रमुखान्वीरान्भोजांश्चैव महाबलान् ॥ १८-४-१७ (९८५६९)
सोमेन सहितं पश्य सौभद्रमपराजितम् ।
अभिमन्युं महेष्वासं निशाकरसमद्युतिम् ॥ १८-४-१८ (९८५७०)
एष पाण्डुर्महेष्वासः कुन्त्या माद्र्या च सङ्गतः ।
विमानेन सदाऽभ्येति पिता तव ममान्तिकम् ॥ १८-४-१९ (९८५७१)
वसुभिः सहितं पश्य भीष्मं शान्तनवं नृपम् ।

द्रोणं बृहस्पतेः पार्श्वे गुरुमेनं निशामय ॥ १८-४-२० (९८५७२)
एते चान्ये महीपाला योधास्तव च पाण्डव ।
गन्धर्वसहिता यान्ति यक्षपुण्यजनैस्तथा ॥ १८-४-२१ (९८५७३)
गुह्यकानां गतिं चापि केचित्प्राप्ता नराधिपाः ।
त्यक्त्वा देहं जितः स्वर्गः पुण्यवाग्बुद्धिकर्मभिः ॥ ॥ १८-४-२२ (९८५७४)

इति श्रीमन्महाभारते स्वार्गारोहणपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
Mahabharata - SwargarohaNa Parva - Chapter Footnotes

७-४-२ ब्राह्मेण ब्रह्मणा आराध्येन ॥
७-४-३ उपस्थितं सेवितं अस्त्रैः ॥
७-४-१२ मानुषं मानुषभावम् ॥

स्वर्गारोहणपर्व - अध्याय ००५
॥ श्रीः ॥
१८.५. अध्यायः ५

Mahabharata - SwargarohaNa Parva - Chapter Topics
वैशम्पायनेन जनमेजयंप्रति भीष्मद्रोणादीनां
स्वस्वसुकृतफलत्वेन स्वर्गभोगानन्तरं स्वैस्स्वैरंशिभिः
सहैक्यप्राप्तिकथनम् ॥ १ ॥
जनमेजयेन यज्ञान्ते सबहुमानमास्तिकादिप्रेषणपूर्वकं तक्षशिलातो
हास्तिनमेत्य प्रजापालनपूर्वकं सुखनिवासः ॥ २ ॥
सौतिना शौनकादीन्प्रति जनमेयाय
वैशम्पायनोक्तभारतकथनसमापनपूर्वकं भारतमहिमप्रशंसनम्
॥ ३ ॥

Mahabharata - SwargarohaNa Parva - Chapter Text

जनमेजय उवाच ।
भीष्मद्रोणौ महात्मानौ धृतराष्ट्रश्च पार्थिवः ।
विराटद्रुपदौ चोभौ शङ्खश्चैवोत्तरस्तथा ॥ १८-५-१ (९८५७५)
धृष्टकेतुर्जयत्सेनो राजा चैव स सत्यजित् ।
दुर्योधनसुताश्चैव शकुनिश्चैव सौबलः ॥ १८-५-२ (९८५७६)
कर्णपुत्राश्च विक्रान्ता राजा चैव जयद्रथः ।
घटोत्कचादयश्चैव ये चान्ये नानुकीर्तिताः ॥ १८-५-३ (९८५७७)

ये चान्ये कीर्तिता वीरा राजानो दीप्तमूर्तयः ।
स्वर्गे कालं कियन्तं ते तस्थुस्तदपि शंस मे ॥ १८-५-४ (९८५७८)
आहोस्विच्छाश्वतं स्थानं तेषां तत्र द्विजोत्तम ।
अन्ते वा कर्मणां कां ते गतिं प्राप्ता नरर्षभाः ॥ १८-५-५ (९८५७९)
एतदिच्छाम्यहं श्रोतुं प्रोच्यमानं द्विजोत्तम ।
तपसा हि प्रदीप्तेन सर्वं त्वमनुपश्यति ॥ १८-५-६ (९८५८०)
सौतिरुवाच। १८-५-७क्ष् (८०९९)
इत्युक्तः स तु विप्रर्षिरनुज्ञातो महात्मना ।
व्यासेन तस्य नृपतेराख्यातुमुपचक्रमे। १८-५-७ (९८५८१)
वैशम्पायन उवाच। १८-५-८क्ष् (८१००)
गन्तव्यं कर्मणामन्ते सर्वेषां मनुजाधिप ।
शृणु गुह्यमिदं राजन्देवानां भरतर्षभ ।
यदुवाच महातेजा दिव्यचक्षुः प्रतापवान् ॥ १८-५-८ (९८५८२)
मुनिः पुराणः कौरव्य पाराशर्यो महाव्रतः ।
अगाधबुद्धिः सर्वज्ञो गतिज्ञः सर्वकर्मणाम् ॥ १८-५-९ (९८५८३)
तेनोक्तं कर्मणामन्ते प्रविशन्ति स्विकां तनुम् ॥ १८-५-१० (९८५८४)
वसूनेव महातेजा भीष्मः प्राप महाद्युतिः ।
अष्टावेव हि दृश्यन्ते वसवो भरतर्षभ ॥ १८-५-११ (९८५८५)
बृहस्पतिं विवेशाथ द्रोणो ह्यङ्गिरसां वरम् ।
कृतवर्मा तु हार्दिक्यः प्रविवेश मरुद्गणान् ॥ १८-५-१२ (९८५८६)
सनत्कुमारं प्रद्युम्नः प्रविवेश यथागतम् ।
धृतराष्ट्रो धनेशस्य लोकान्प्राप दुरासदान् ॥ १८-५-१३ (९८५८७)
धृतराष्ट्रो सहिता गन्धारी च यशस्विनी ।
पत्नीभ्यां सहितः पाण्डुमहेन्द्रसदनं ययौ ॥ १८-५-१४ (९८५८८)
विराटद्रुपदौ चोभौ धृष्टकेतुश्च पार्थिवः ।
निशठाक्रूरसाम्बाश्च भानुः कण्वो विदूरथः ॥ १८-५-१५ (९८५८९)
भूरिश्रवाः शलश्चैव भूरिश्च पृथिवीपतिः ।
कंशश्चैवोग्रसेनश्च वसुदेवस्तथैव च ॥ १८-५-१६ (९८५९०)
उत्तरश्च सह भ्रात्रा शङ्खेन नरपुङ्गवः ।
विश्वेषां देवतानां ते विविशुर्नरसत्तमाः ॥ १८-५-१७ (९८५९१)
श्वर्चा नाम महातेजाः सोमपुत्रः प्रतापवान् ।
सोभिमन्युर्नृसिंहस्य फल्गुनस्य सुतोऽभवत् ॥ १८-५-१८ (९८५९२)
स युद्ध्वा क्षत्रधर्मेण यथा नान्यः पुमान्क्वचित् ।
विवेश सोमं धर्मात्मा कर्मणोन्ते मरारथः ॥ १८-५-१९ (९८५९३)
आविवेश रविं कर्णो निहतः पुरुषर्षभ ।
द्वापरं शकुनिः प्राप धृष्टद्युम्नस्तु पावकम् ॥ १८-५-२० (९८५९४)

धृतराष्ट्रात्मजाः सर्वे यातुधानान्प्रपेदिरे ।
धर्ममेवाविशत्क्षत्ता राजा चैव युधिष्ठिरः ॥ १८-५-२१ (९८५९५)
अनन्तो भगवान्देवः प्रविवेश रसातलम् ।
पितामहनियोगाद्धि यो योगाद्गामधारयत् ॥ १८-५-२२ (९८५९६)
यः स नारायणो नाम देवदेवः सनातनः ।
तस्यांशो वासुदेवस्तु कर्मणोन्ते विवेश ह ॥ १८-५-२३ (९८५९७)
षोडशस्त्रीसहस्राणि वासुदेवपरिग्रहाः ।
अमज्जंस्ताः सरस्वत्यां कालेन जनमेजय ॥ १८-५-२४ (९८५९८)
तत्र त्यक्त्वा शरीराणि दिवमारुरुहुः पुनः ।
ताश्चैवाप्सरसो भूत्वा वासुदेवमुपाविशन् ॥ १८-५-२५ (९८५९९)
हतास्तस्मिन्महायुद्धे ये वीरास्तु महारथाः ।
घटोत्कचादयश्चैव देवान्यक्षांश्च भेजिरे ॥ १८-५-२६ (९८६००)
दुर्योधनसहायाश्च राक्षसा येऽनुकीर्तिताः ।
प्राप्तास्ते क्रमशो राजन्सर्वलोकाननुत्तमान् ॥ १८-५-२७ (९८६०१)
भवनं च महेन्द्रस्य कुबेरस्य च धीमतः ।
वरुणस्य तथा लोकान्विविशुः पुरुषर्षभाः ॥ १८-५-२८ (९८६०२)
एतत्ते सर्वमाख्यातं विस्तरेण महाद्युते ।
कुरूणां चरितं कृत्स्नं पाण्डवानां च भारत ॥ १८-५-२९ (९८६०३)
सौतिरुवाच। १८-५-३०क्ष् (८१०१)
एतच्छ्रुत्वा द्विजश्रेष्ठात्स राजा जनमेजयः ।
विस्मितोऽभवदत्यर्थं यज्ञकर्मान्तरेष्वथ ॥ १८-५-३० (९८६०४)
ततः समापयामासुः कर्म तत्तस्य याजकाः ।
आस्तिकश्चाभवत्प्रीतः परिमोक्ष्य भुजङ्गमान् ॥ १८-५-३१ (९८६०५)
ततो द्विजातीन्सर्वास्तान्दक्षिणाभिरतोषयत् ।
पूजिताश्चापि ते राज्ञा ततो जग्मुर्यथागतम् ॥ १८-५-३२ (९८६०६)
विसर्जयित्वा विप्रांस्तान्राजाऽपि जनमेजयः ।
हृष्टस्तक्षशिलायाः स पुनरायाद्गजाह्वयम् ॥ १८-५-३३ (९८६०७)
एतत्ते सर्वमाख्यातं वैशम्पायनकीर्तितम् ।
व्यासाज्ञया समाज्ञातं सर्पसत्रे नृपस्य हि ॥ १८-५-३४ (९८६०८)
पुण्योऽयमितिहासाख्यः पवित्रं चेदमुत्तमम् ।
कृष्णेन मुनिना विप्र निर्मितं सत्यवादिना ॥ १८-५-३५ (९८६०९)
सर्वज्ञेन विधिज्ञेन धर्मज्ञानवता सता ।
अतीन्द्रियेण शुचिना तपसा भावितात्मना ॥ १८-५-३६ (९८६१०)
ऐश्वर्ये वर्तता चैव साङ्ख्ययोगवता तथा ।
नैकतन्त्रविबुद्धेन दृष्ट्वा दिव्येन चक्षुषा ॥ १८-५-३७ (९८६११)
कीर्तिं प्रथयता लोके पाण्डवानां महात्मनाम् ।

अन्येषां क्षत्रियाणां च भूरिद्रविणतेजसाम् ॥१८-५-३८ (१८६१२)
ग्क्रीडां च वासुदेवस्य देवदेवस्य शाङ्गिणः ।
विश्वेषां देवभागानां जन्मसायुज्यमेव च ॥ ' १८-५-३९ (१८६१३)
य इदं शृणुयाद्विद्वान्पर्वसु द्विजसत्तमः ।
धूतपाप्मा जितस्वर्गो ब्रह्मभूयाय गच्छति ॥१८-५-४० (१८६१४)
कार्ष्णं वेदमिमं सर्वं शृणुयाद्यः समाहितः ।
ब्रह्महत्याकृतं पापं तत्क्षणादेव नश्यति ॥१८-५-४१ (१८६१५)
यश्चेदं श्रावयेच्छ्राद्धे ब्राह्मणान्पादमन्ततः ।
अक्षय्यमन्नपानं वै पितॄंस्तस्योपतदिष्ठते ॥१८-५-४२ (१८६१६)
अह्ना यदेनः कुरुते इन्द्रियैर्मनसाऽपि वा ।
महाभारतमाख्याय सर्पपापैः प्रमुच्यते ॥१८-५-४३ (१८६१७)
श्यद्रात्रौ कुरुते पापं ब्राह्मणः स्त्रीगणैर्वृतः ।
महाभारतमाख्याय पूर्वां सन्ध्यां प्रमुच्यते ॥१८-५-४४ (१८६१८)
महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥१८-५-४५ (१८६१९)
अष्टादशपुराणानि धर्मशास्त्राणि सर्वशः ।
वेदाः साङ्गास्तथैकत्र भारतं चैकतः स्थितम् ॥१८-५-४६ (१८६२०)
श्रूयतां सिंहनादोऽयमृषेस्तस्य महात्मनः ।
अष्टादशपुराणानां कर्तुर्वेदमहोदधेः ॥१८-५-४७ (१८६२१)
त्रिभिर्वर्षैर्महत्पुण्यं कृष्णद्वैपायनः प्रभुः ।
अखिलं भारतं चेदं चकार भगवान्मुनिः ॥१८-५-४८ (१८६२२)
श्आकर्ण्य भक्त्या सततं जयाख्यं भारतं महत् ।
श्रीश्च कीर्तिस्तथा विद्या भवन्ति सहिताः सदा ॥ḃ १८-५-४९ (१८६२३)
धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न कुत्रिचित् ॥१८-५-५० (१८६२४)
"वाच्यते यत्र सततं जयाख्यं भारतं महत् ।
श्रीश्च कीर्तिश्च विद्या च भवन्ति मुदिताः सदा ॥१८-५-५१ (१८६२५)
भारतस्य तु वक्तारं ब्रह्मर्षिं च महागुरुम् ॥
वैशम्पायनमारोप्य स्वर्णभद्रासनं तदा ॥१८-५-५२ (१८६२६)
जनमेजयादिराजान आस्तिकाद्या द्विजातयः ।
धर्मदत्तादिवैश्याश्च सोम्यवंश्यादिशूद्रकाः ॥१८-५-५३ (१८६२७)
प्रयुतं चायुतं चेति सहस्रं शतमित्यपि ।
दशकं चेति निष्काणामानर्चुस्तं महागुरुम् ॥१८-५-५४ (१८६२८)
निष्काणां दशकं दत्त्वा मृतपुत्रोऽमृतप्रजः ।
ऊष्मादिव्याधियुक्तश्च शतं दत्त्वा निरामयः ॥१८-५-५५ (१८६२९)
सहस्रदानात्संतानहीनः संतानपुत्रवान् ।

आयुरारोग्यमैश्वर्यं भेजुस्तेऽन्नं च पुत्रकान् ॥१८-५-५६ (१८६३०)
सुवर्णं रजतं रत्नं सर्वाण्याभरणानि च ।
सर्वोपकरणैर्युक्तं निधिनिक्षेपसंयुतम् ॥१८-५-५७ (१८६३१)
इष्टकाभित्तिसंयुक्तमग्निबाधादिवर्जितम् ।
देवपूजाग्निहोत्रादिपाठार्थगृहसंयुतम् ।
सान्तर्बहिस्संवरणं सप्रासादं सगोगृहम् ॥ १८-५-५८ (१८६३२)
व्यष्ट्या समष्ट्या वा दद्यात्स्वर्गारोहणपर्वणि ।
निवृत्तिकामो दद्याच्चेत्पुनर्जन्म न विद्यते ॥१८-५-५९ (१८६३३)
सकामश्चेद्ब्रह्मकल्पं सुकं ब्रह्मगृहे वसेत् ॥ १८-५-६० (१८६३४)
पुराणमुखतो यस्माद्वेदान्तज्ञानमाप्यते ।
स तेन गुरुराख्यातस्तत्पूजा हीशपूजनम् ॥१८-५-६१ (१८६३५)
भारतस्य तु वक्तारं श्रोतारं लेखकांस्तदा ।
प्रपूजयन्ति संहृष्टाः सिद्धाश्च परमर्षयः ॥१८-५-६२ (१८६३६)
महाभारतवक्तारं नार्चयन्तीह ये नराः ।
तेषां सर्वक्रियाहानिर्भवेद्देवाः शपन्ति च ॥' १८-५-६३ (१८६३७)
जयो नामेतिहासोऽयं श्रोतव्यो जयमिच्छता ।
राज्ञा राजसुतैश्चैव गर्भिण्या चैव योषिता ॥१८-५-६४ (१८६३८)
श्स्वर्गकामो लभेत्स्वर्गं जयकामो लभेज्जयम् ।
गर्भिणी लभते पुत्रं कन्यां वा बहुभागिनीम् ॥१८-५-६५ (१८६३९)
अनागतश्च मोक्षश्च कृष्णद्वैपायनः प्रभुः ।
संदर्भं भारतस्यास्य कृतवान्धर्मकाम्यया ॥१८-५-६६ (१८६४०)
षष्टिं शतसहस्राणि चकारान्यां स संहिताम् ।
त्रिंशच्छतसहस्राणि देवलोके प्रतिष्ठितम् ॥१८-५-६७ (१८६४१)
पित्र्ये पञ्चदशं ज्ञेयं यक्षलोके चतुर्दश ।
एकं शतसहस्रं तु मानुषेषु प्रभाषितम् ॥१८-५-६८ (१८६४२)
नारदोऽश्रावयद्देवानसितो देवलः पितॄन् ।
रक्षोयक्षाञ्शुको मर्त्यान्वैशम्पायन एव तु ॥१८-५-६९ (१८६४३)
इतिहासमिमं पुण्यं महार्थं वेदसंमितम् ।
व्यासोक्तं श्रूयते येन कृत्वा ब्राह्मणमग्रतः ॥१८-५-७० (१८६४४)
स नरः सर्वकामांश्च कीर्तिं प्राप्येह शौनक ।
गच्छेत्परमिकां सिद्धिमत्र मे नास्ति संशयः ॥१८-५-७१ (१८६४५)
भारताध्ययनात्पुण्यादपि पादमधीयतः ।
श्रद्धया परया भक्त्या श्राव्यते चापि येन तु ।
य इमां संहितां पुण्यां पुत्रमध्यापयच्छुकम् ॥ १८-५-७२ (१८६४६)
मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे ॥१८-५-७३ (१८६४७)

हर्षस्थानसहस्राणि भयस्थानशतानि च ।
दिवसेदिवसे मूढमाविशन्ति न पण्डितम् ॥१८-५-७४ (१८६४८)
ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥१८-५-७५ (१८६४९)
न जातु कामान्न भयान्न लोभा-
द्धर्मं त्यजेज्जीवितस्यापि हेतोः ।
नित्यो धर्मः सुखदुःखे त्वनित्ये
जीवो नित्यो हेतुरस्य त्वनित्यः ॥ १८-५-७६ (१८६५०)
इमां भारतसावित्रीं प्रातरुत्थायः यः पठेत् ।
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ॥१८-५-७७ (१८६५१)
कयथा समुद्रो भगवान्यथा हि हिमवान्गिरिः ।
ख्यातावुभौ रत्ननिधी तथा भारतमुच्यते ॥१८-५-७८ (१८६५२)
कार्ष्णं देवमिमं विद्वाञ्श्रावयित्वाऽर्थमश्नुते ।
इदं भारतमाख्यानं यः पठेत्सुसमाहितः ।
स गच्छेत्परमां सिद्धिमिति मे नास्ति संशयः ॥ १८-५-७९ (१८६५३)
द्वैपायनोष्ठपुटनिस्सृतमप्रमेयं
पुण्यं पवित्रमथ पापहरं शिवं च ।
यो भारतं समधिगच्छति वाच्यमानं
किं तस्य पुष्करजलैरभिषेचनेन ॥ १८-५-८० (१८६५४)
यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे सुबहुश्रुताय ।
पुण्यां च भारतकथां सततं शृणोति
तुल्यं फलं भवति तस्य च तस्य चैव ॥ꣳ १८-५-८१ (१८६५५)
"यद्यदिष्टतमं कामं लभते श्रद्धयाऽन्वितः ।
शृणुयान्मुदितो भूत्वा आस्तिको बुद्धिसंयुतः ॥१८-५-८२ (१८६५६)
वासुदेवं स्मरन्विद्वान्पुण्डरीकायतेक्षणम् ।
इतिहासमिमं पुण्यं महार्थं वेदसंमितम् ॥१८-५-८३ (१८६५७)
श्रावयेद्यस्तु वर्णादीन्कृत्वा ब्राह्मणमग्रतः ।
सर्वपापविशुद्धात्मा शुचिस्तद्गतमानसः ॥१८-५-८४ (१८६५८)
इह कीर्तिं महत्प्राप्य भोगवान्सुखमश्नुते ।
व्यासप्रसादेन पुनः स्वर्गलोकं स गच्छति ॥१८-५-८५ (१८६५९)
एतद्विदित्वा सर्वं तु सर्ववेदार्थविद्भवेत् ।
पूजनीयश्च सततं माननीयो भवेद्द्विजः ॥" ॥ १८-५-८६ (१८६६०)

इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
स्वर्गारोहणपर्वणि पञ्चमोऽध्यायः ॥५ ॥ ॥समाप्तं

स्वर्गारोहणपर्व ॥ १८ ॥ इति श्रीमन्महाभारतं समाप्तम्॥

Mahabharata - SwargarohaNa Parva - Chapter Footnotes

७-५-८ न शक्यं कर्मिणामन्ते सर्वेण मनुजाधिप । प्रकृतिं किंनु सम्यक्ते पृच्छैषा सम्प्रयोजितेतिय झ। पाठः ॥
७-५-३६ विधिज्ञेन दैवज्ञेन । अतीन्द्रियेणेन्द्रियाण्यतिक्रान्तेन ॥
७-५-३८ सर्वेषां तृतीयान्तानां निर्मितमित्यनेनान्वयः । अन्येषामपि कीर्तिवासुदेवस्य क्रीडां च प्रथयतेति सम्बन्धः ॥
७-५-४० यश्चेदं श्रावयेद्विद्वान्सदा पर्वणिपर्वणि । ब्रह्मभूयाय कल्पते। इति झ पाठः ॥
७-५-४१ ब्रह्महत्यादिप्पपानां कोटिस्तस्य विनश्यति इति झ पाठः। ७-५-४२ अन्ततो निकटे। ।
७-५-४३ आख्याय पश्चात्संध्यां प्रमुच्यत इति झ पाठः । तत्र महाभारतस्याल्पमपि पश्चिमायां संध्यायां पठ्यते चेद्दिनकृतं पापं नश्यति। एवं प्रातः संध्यायां रात्रिकृतमित्यर्थः ॥
७-५-४५ निरुक्तं नामनिर्वचनं ॥
७-५-४८ त्रिभिर्वर्षैरिदं पूर्णमिति झ पाठः ॥
७-५-५० चकारचतुष्टयादधर्मादिचतुष्टयमप्यत्रोक्तं हानार्तमिति बोध्यम् ॥
७-५-६४ श्रोतव्यो मोक्षमिच्छता । ब्राह्मणेन च राज्ञा च गार्भिण्या इति पाठः ॥
७-५-६६ अनागतोऽनागन्तुको नित्यसिद्ध इतियावत् । एवंविधो यो मोक्षः कैवल्यं तदेव स्वरूपं यस्य स मोक्षः। यद्वा मोक्तुमिच्छन्। मुचोऽकर्मिकस्य गुणो वेति सनि गुणोऽभ्यासलोपश्च। मुमुक्षुरित्यर्थः। लोकहित इति भावः ॥
७-५-६७ अन्यां वेदचतुष्टयसंहिताभ्यः पृथग्भूतां तदर्थवतीम् ॥
७-५-७० श्रूयते येन यः शृणोतीत्यर्थः । उभयत्र विभक्तिव्यत्यय आर्षः ॥
७-५-७२ भारताध्ययनादिति सार्धश्लोकः । यः व्यासः इमां संहितां शुकं पुत्रं अध्यापयत्। तस्य अधीयतो भारताख्यमितिहासं स्मरतः। स्मृत्वा च ग्रन्थरूपेण प्रणयतः। भक्त्या परया श्रद्धया च व्यास एव पूज्यस्तस्य वाक्यं प्रमाणमेवेत्यास्तिक्यबुद्द्या येन पुंसा इदं श्राव्यते सु पुण्यात् पुण्यकरात् अपि पादं श्लोकपादं ग्रन्थपादं वा भारतस्याध्ययनात्परमिकां सिद्धिं गच्छेदिति पूर्वेणान्वयः। व्यासे

श्रद्धां बद्ध्वा भारतमध्येव्यभित्यर्थः ॥
७-५-७३ संध्यायां भारतं पठनीयमित्युक्तं तत्र पठनायोग्यं
भारतसारसंग्रहं चतुः श्लोकीरूपमाह मातेति ॥

स्वर्गारोहणपर्व - अध्याय ००६
॥ श्रीः ॥
१८.६. भारतश्रवणव

भारतश्रवणविध्यध्यायः ।
Mahabharata - SwargarohaNa Parva - Chapter Text

जनमेजय उवाच ।
भगवन्केन विधिना श्रोतव्यं भारतं बुधैः ।
फलं किं के च देवाश्च पूज्या वै पारणेष्विह ॥ १८-६-१ (९८६६१)
देयं समाप्ते भगवन्किं च पर्वणिपर्वणि ।
वाचकः कीदृशश्चात्र एष्टव्यस्तद्ब्रवीहि मे ॥ १८-६-२ (९८६६२)
वैशम्पायन उवाच। १८-६-३क्ष् (८१०२)
शृणु राजन्विधिमिमं फलं यच्चापि भारतात् ।
श्रुताद्भवति राजेन्द्र यत्त्वं मामनुपृच्छसि ॥ १८-६-३ (९८६६३)
दिवि देवा महीपाल क्रीडार्थमवनिं गताः ।
कृत्वा कार्यमिदं चैव ततश्च दिवमागताः ॥ १८-६-४ (९८६६४)
हन्त यत्ते प्रवक्ष्यामि तच्छृणुष्व समाहितः ।
ऋषीणां देवतानां च सम्भवं वसुधातले ॥ १८-६-५ (९८६६५)
अत्र रुद्रास्तथा साध्या विश्वेदेवाश्च शाश्वताः ।
आदित्याश्चाश्विनौ देवौ लोकपाला महर्षयः ॥ १८-६-६ (९८६६६)
गुह्यकाश्च सगन्धर्वा नागा विद्याधरास्तथा ।
सिद्धा धर्मः स्वयंभूश्च मुनिः कात्यायनो वरः ॥ १८-६-७ (९८६६७)
गिरयः सागरा नद्यस्तथैवाप्सरसां गणाः ।
ग्रहाः संवत्सराश्चैव अयनान्यृतवस्तथा ॥ १८-६-८ (९८६६८)
स्थावरं जङ्गमं चैव जगत्सर्वं सुरासुरम् ।
भातरे भरतश्रेष्ठ एकस्थमिह दृश्यते ॥ १८-६-९ (९८६६९)
तेषां श्रुत्वा प्रतिष्ठानं नामकर्मानुकीर्तनात् ।
कृत्वाऽपि पातकं घोरं सद्यो मुच्येत मानवः ॥ १८-६-१० (९८६७०)
इतिहासमिमं श्रुत्वा यथावदनुपूर्वशः ।
संयतात्मा शुचिर्भूत्वा पारं गत्वा च भारते ॥ १८-६-११ (९८६७१)
तेषां श्राद्धानि देयानि श्रुत्वा भारत भारतम् ।

ब्राह्मणेभ्यो यथाशक्त्या भक्त्या च भरतर्षभ ॥१८-६-१२ (९८६७२)
महादानानि देयानि रत्नानि विविधानि च ।
गावः कांस्योपदोहाश्च कन्याश्चैव स्वलङ्कृताः ॥१८-६-१३ (९८६७३)
सर्वकामगुणोपेता यानानि विविधानि च ।
कभवनानि विचित्राणि भूमिर्वासांसि काञ्चनम् ॥१८-६-१४ (९८६७४)
वाहनानि च देयानि हया मत्ताश्च वारणाः ।
शयनं शिबिकाश्चैव स्यन्दनाश्च स्वलंकृताः ॥१८-६-१५ (९८६७५)
यद्यद्गृहे वरं किञ्चिद्यद्यदस्ति महद्वसु ।
तत्तद्देयं द्विजातिभ्य आत्मा दाराश्च सूनवः ॥१८-६-१६ (९८६७६)
श्रद्धया परया युक्तं क्रमशस्तस्य पारगः ।
शक्तितः सुमना हृष्टः सुश्रूषुरविकल्पकः ॥१८-६-१७ (९८६७७)
सत्यार्जवरतो दान्तः शुचिः शौचसमन्वितः ।
श्रद्धधानो जितक्रोधो यथा सिद्ध्यति तच्छृणु ॥१८-६-१८ (९८६७८)
शुचिः शीलान्विताचारः शुक्लवासा जितेन्द्रियः ।
संस्कृतः सर्वशास्त्रज्ञः श्रद्दधानोऽनसूयकः ॥१८-६-१९ (९८६७९)
रूपवान्सुभगो दान्तः सत्यवादी जितेन्द्रियः ।
दानमानगृहीतश्च कार्यो भवति वाचकः ॥१८-६-२० (९८६८०)
अविलम्बमनायस्तमद्रुतं धीरमुर्जितम् ।
असंसक्ताक्षरपदं स्वरभावसमन्वितम् ॥१८-६-२१ (९८६८१)
त्रिषष्टिवर्णसंयुक्तमष्टस्थानसमीरितम् ।
वाचयेद्वाचकः स्वस्थः स्वासीनः सुसमाहितः ॥१८-६-२२ (९८६८२)
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं(व्यासं) चैव ततो जयमुदीरयेत् ॥१८-६-२३ (९८६८३)
ईदृशाद्वाचकाद्राजञ्श्रुत्वा भारत भारतम् ।
नियमस्थः शुचिः श्रोता शृण्वन्स फलमश्नुते ॥१८-६-२४ (९८६८४)
पारणं प्रथमं प्राप्य द्विजान्कामैश्च तर्पयन् ।
आग्निष्टोमस्य यज्ञस्य फलं वै लभते नरः ॥१८-६-२५ (९८६८५)
अप्सरोगणसंकीर्णं विमानं लभते महत् ।
प्रहृष्टः स तु देवैश्च दिवं याति समाहितः ॥१८-६-२६ (९८६८६)
द्वितीयं पारणं प्राप्य सोतिरात्रफलं लभेत् ।
सर्वरत्नमयं दिव्यं विमानमधिरोहति ॥१८-६-२७ (९८६८७)
दिव्यमाल्यांबरधरो दिव्यगन्धविभूषितः ।
दिव्याङ्गदधरो नित्यं देवलोके महीयते ॥१८-६-२८ (९८६८८)
तृतीयं पारणं प्राप्य द्वादशाहफलं लभेत् ।
वसत्यमरसंकाशो वर्षाण्ययुतशो दिवि ॥१८-६-२९ (९८६८९)
चतुर्थे वाजपेयस्य पञ्चमे द्विगुणं फलम् ।

उदितादित्यसंकाशं ज्वलन्तमनलोपमम् ॥ १८-६-३० (९८६९०)
विमानं विबुधैः सार्धमारुह्य दिवि गच्छति ।
वर्षायुतानि भने शक्रस्य दिवि मोदते ॥ १८-६-३१ (९८६९१)
षष्ठे द्विगुणमस्तीति सप्तमे त्रिगुणं फलम् ।
कैलासशिखराकारं वैदूर्यमणिवेदिकम् ॥ १८-६-३२ (९८६९२)
परिक्षिप्तं च बहुधा मणिविद्रुमभूषितम् ।
विमानं समधिष्ठाय कामगं साप्सरोगणम् ॥ १८-६-३३ (९८६९३)
सर्वांल्लोकान्विचरते द्वितीय इव भास्करः ।
अष्टमे राजसूयस्य पारणे लभते फलम् ॥ १८-६-३४ (९८६९४)
चन्द्रोदयनिभं रम्यं विमानमधिरोहति ।
चन्द्ररश्मिप्रतीकाशैर्हयैर्युक्तं मनोजवैः ॥ १८-६-३५ (९८६९५)
सेव्यमानो वरस्त्रीणां चन्द्रात्कान्ततरैर्मुखैः ।
मेखलानां निनादेन नूपुराणां च निःस्वनैः ॥ १८-६-३६ (९८६९६)
अङ्के परमनारीणां सुखसुप्तो विबुध्यते ।
नवमे क्रतुराजस्य वाजिमेधस्य भारत ॥ १८-६-३७ (९८६९७)
काञ्चनस्तंभनिर्यूहवैदूर्यकृतवेदिकम् ।
जांबूनदमयैर्दिव्यैर्गवाक्षैः सर्वतो वृतम् ॥ १८-६-३८ (९८६९८)
सेवितं चाप्सरःसङ्घैर्गन्धर्वैर्दिविचारिभिः ।
विमानं समधिष्ठाय श्रिया परमया ज्वलन् ॥ १८-६-३९ (९८६९९)
दिव्यमाल्यांबरधरो दिव्यचन्दनरूषितः ।
मोदते दैवतैः सार्धं दिवि देव इवापरः ॥ १८-६-४० (९८७००)
दशमं पारणं प्राप्य द्विजातीनभिवन्द्य च ।
किङ्किणीजालनिर्घोषं पताकाध्वजशोभितम् ॥ १८-६-४१ (९८७०१)
रत्नवेदिकसम्बाद्यं वैदूर्यमणितोरणम् ।
हेमजालपरिक्षिप्तं प्रवालवलभीमुखम् ॥ १८-६-४२ (९८७०२)
गन्धर्वैर्गीतकुशलैरप्सरोभिश्च शोभितम् ।
विमानं सुकृतावासं सुखेनैवोपपद्यते ॥ १८-६-४३ (९८७०३)
मुकुटेनाग्निवर्णेन जांबूनदविभूषिणा ।
दिव्यचन्दनदिग्धाङ्गो दिव्यमाल्यविभूषितः ॥ १८-६-४४ (९८७०४)
दिव्याँल्लोकान्विचरति दिव्यैर्भोगैः समन्वितः ।
विबुधानां प्रसादेन श्रिया परमया युतः ॥ १८-६-४५ (९८७०५)
अथ वर्षगणानेवं स्वर्गलोके महीयते ।
ततो गन्धर्वसहितः सहस्राण्येकविंशतिम् ॥ १८-६-४६ (९८७०६)
पुरंदरपुरे रम्ये शक्रेण सह मोदते ।
दिव्ययानविमानेषु लोकेषु विविधेषु च ॥ १८-६-४७ (९८७०७)
दिव्यनारीगणाकीर्णो निवसत्यमरो यथा ।

ततः सूर्यस्य भवने चन्द्रस्य भवने तथा ॥ १८-६-४८ (९८७०८)
शिवस्य भवने राजन्विष्णोर्याति सलोकताम् ।
एवमेतन्महाराज नात्र कार्या विचारणा। १८-६-४९ (९८७०९)
श्रद्दधानेन वै भाव्यमेवमाह गुरुर्मम ।
वाचकस्य तु दातव्यं मनसा यद्यदिच्छति ॥ १८-६-५० (९८७१०)
हस्त्यश्वरथयानानि वाहनानि विशेषतः ।
कटके कुण्डले चैव ब्रह्मसूत्रं तथा परम् ॥ १८-६-५१ (९८७११)
वस्त्रं चैव विचित्रं च गन्धं चैव विशेषतः ।
देववत्पूजयेत्तं तु विष्णुलोकमवाप्नुयात् ॥ १८-६-५२ (९८७१२)
अतः परं प्रवक्ष्यामि यानि देयानि भारते ।
वाच्यमाने तु विप्रेभ्यो राजन्पर्वणिपर्वणि ॥ १८-६-५३ (९८७१३)
जातिं देशं च सत्यं च माहात्म्यं भरतर्षभ ।
धर्मं वृत्तिं च विज्ञाय क्षत्रियाणां नराधिप ॥ १८-६-५४ (९८७१४)
स्वस्ति वाच्य द्विजानादौ ततः कार्ये प्रवर्तिते ।
समाप्ते पर्वणि ततः स्वशक्त्या पूजयेद्द्विजान् ॥ १८-६-५५ (९८७१५)
आदौ तु वाचकं चैव वस्त्रगन्धसमन्वितम् ।
विधिवद्भोजयेद्राजन्मधुपायसमुत्तमम् ॥ १८-६-५६ (९८७१६)
ततो मूलफलप्रायं पायसं मधुसर्पिषा ।
आस्तीके भोजयेद्राजन्दद्याच्चैव गुडौदनम् ॥ १८-६-५७ (९८७१७)
अपूपैश्चैव पूपैश्च मोदकैश्च समन्वितम् ।
सभापर्वणि राजेन्द्र हविष्यं भोजयेद्द्विजान् ॥ १८-६-५८ (९८७१८)
आरण्यके मूलफलैस्तर्पयेत्तु द्विजोत्तमान् ।
अरणीपर्व चासाद्य जलकुम्भान्प्रदापयेत् ॥ १८-६-५९ (९८७१९)
तर्पणानि च मुख्यानि वन्यमूलफलानि च ।
सर्वकामगुणोपेतं विप्रेभ्योऽन्नं प्रदापयेत् ॥ १८-६-६० (९८७२०)
विराटपर्वणि तथा वासांसि विविधानि च ।
उद्योगे भरतश्रेष्ठ सर्वकामगुणान्वितम् ॥ १८-६-६१ (९८७२१)
भोजनं भोजयेद्विप्रान्गन्धमाल्यैरलङ्कृतान् ।
भीष्मपर्वणि राजेन्द्र दत्त्वा यानमनुत्तमम् ॥ १८-६-६२ (९८७२२)
ततः सर्वगुणोपेतमन्नं दद्यात्सुसंस्कृतम् ।
द्रोणपर्वणि विप्रेभ्यो भोजनं परमार्चितम् ॥ १८-६-६३ (९८७२३)
शराश्च देया राजेन्द्र चापान्यसिवरास्तथा ।
कर्णपर्वण्यपि तथा भोजनं सार्वकामिकम् ॥ १८-६-६४ (९८७२४)
विप्रेभ्यः संस्कृतं सम्यग्दद्यात्संयतमानसः ।
शल्यपर्वणि राजेन्द्र मोदकैः सगुडौदनैः ॥ १८-६-६५ (९८७२५)
अपूपैस्तर्पणैश्चैव सर्वमन्नं प्रदापयेत् ।

गदापर्वण्यपि तथा मुद्गमिश्रं प्रदापयेत् ॥ १८-६-६६ (९८७२६)
स्त्रीपर्वणि तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान् ।
घृतौदनं पुरस्ताच्च ऐषीके दापयेत्पुनः ॥ १८-६-६७ (९८७२७)
ततः सर्वगुणोपेतमन्नं दद्यात्सुसंस्कृतम् ।
शान्तिपर्वण्यपि तथा हविष्यं भोजयेद्द्विजान् ॥ १८-६-६८ (९८७२८)
आश्वमेधिकमासाद्य भोजनं सार्वकामिकम् ।
तथाऽऽश्रमनिवासे तु हविष्यं भोजयेद्द्विजान् ॥ १८-६-६९ (९८७२९)
मौसले सार्वगुणिकं गन्धमाल्यानुलेपनम् ।
महाप्रास्थानिके तद्वत्सर्वकामगुणान्वितम् ॥ १८-६-७० (९८७३०)
स्वर्गपर्वण्यपि तथा हविष्यं भोजयेद्द्विजान् ।
हरिवंशसमाप्तौ तु सहस्रं भोजयेद्द्विजान् ॥ १८-६-७१ (९८७३१)
गामेकां निष्कसंयुक्तां ब्राह्मणाय निवेदयेत् ।
तदर्धेनापि दातव्या दरिद्रेणापि पार्थिव ॥ १८-६-७२ (९८७३२)
प्रतिपर्वसमाप्तौ तु पुस्तकं वै विचक्षणः ।
सुवर्णेन च संयुक्तं वाचकाय निवेदयेत् ॥ १८-६-७३ (९८७३३)
हरिवंशे पर्वणि च पायसं तत्र भोजयेत् ।
पारणेपारणे राजन्यथावद्भरतर्षभ ॥ १८-६-७४ (९८७३४)
समाप्य सर्वाः प्रयतः संहिताः शास्त्रकोविदः ।
शुभे देशे निवेश्याथ क्षौमवस्त्राभिसंवृताः ॥ १८-६-७५ (९८७३५)
शुक्लांबरधरः स्रग्वी शुचिर्भूत्वा स्वलङ्कृतः ।
अर्चयेत् यथान्यायं गन्धमाल्यैः पृथक्पृथक्। १८-६-७६ (९८७३६)
संहितापुस्तकान्राजन्प्रयतः सुसमाहितः ।
भक्ष्यैर्माल्यैस्च पेयैश्च कामैश्च विविधैः शुभैः ॥ १८-६-७७
(९८७३७)
हिरण्यं च सुवर्णं च दक्षिणामथ दापयेत् ।
सर्वत्र त्रिपलं स्वर्णं दातव्यं प्रयतात्मना ॥ १८-६-७८ (९८७३८)
तदर्धं पादशेषं वा वित्तशाठ्यविवर्जितम् ।
यद्यदेवात्मनोऽभीष्टं तत्तद्देयं द्विजातये ॥ १८-६-७९ (९८७३९)
सर्वथा तोषयेद्भक्त्या वाचकं गुरुमात्मनः ।
देवताः कीर्तयेत्सर्वा नरनारायणौ तथा ॥ १८-६-८० (९८७४०)
ततो गन्धैश्च माल्यैश्च स्वलङ्कृत्य द्विजोत्तमान् ।
तर्पयेद्विविधैः कानैर्दानैश्चोच्चावचैस्तथा ॥ १८-६-८१ (९८७४१)
अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः ।
प्राप्नुयाच्च क्रतुफलं तथा पर्वणिपर्वणि ॥ १८-६-८२ (९८७४२)
वाचको भरतश्रेष्ठ व्यक्ताक्षरपदस्वरः ।
भविष्यं श्रावयेद्विद्वान्भारतं भरतर्षभ ॥ १८-६-८३ (९८७४३)

भुक्तवत्सु द्विजेन्द्रेषु यथावत्सम्प्रदापयेत् ।
वाचकं भरतश्रेष्ठ भोजयित्वा स्वलंकृतम् ॥ १८-६-८४ (९८७४४)
वाचके परितुष्टे तु शुभा प्रीतिरनुत्तमा ।
ब्राह्मणेषु तु तुष्टेषु प्रसन्नाः सर्वदेवताः ॥ १८-६-८५ (९८७४५)
ततो हि वरणं कार्यं द्विजानां भरतर्षभ ।
सर्वकामैर्यथान्यायं साधुभिश्च पृथग्विधैः ॥ १८-६-८६ (९८७४६)
इत्येषि विधिरुद्दिष्टो मया ते द्विपदांवर ।
श्रद्दधानेन वै भाव्यं यन्मां त्वं परिपृच्छसि ॥ १८-६-८७ (९८७४७)
भारश्रवणे राजन्पारणे च नृपोत्तम ।
सदा यत्नवता भाव्यं श्रेयस्तु परमिच्छता ॥ १८-६-८८ (९८७४८)
भारतं शृणुयान्नित्यं भारतं परिकीर्तयेत् ।
भारतं भवने यस्य तस्य हस्तगतो जयः ॥ १८-६-८९ (९८७४९)
भारतं परमं पुण्यं भारते विविधाः कथाः ।
भारतं सेव्यते देवैर्भारतं परमं पदम् ॥ १८-६-९० (९८७५०)
भारतं सर्वशास्त्राणामुत्तमं भरतर्षभ ।
भारतात्प्राप्यते मोक्षस्तत्त्वमेतद्ब्रवीमि तत् ॥ १८-६-९१ (९८७५१)
महाभारतमाख्यानं क्षितिं गां च सरस्वतीम् ।
ब्राह्मणान्केशवं चैव कीर्तयन्नावसीदति ॥ १८-६-९२ (९८७५२)
वेदे रामायणे पुण्ये भारते भरतर्षभ ।
आदौ चान्ते च मध्ये च हरिः सर्वत्र गीयते ॥ १८-६-९३ (९८७५३)
यत्र विष्णुकथा दिव्याः श्रुतयश्च सनातनाः ।
तच्छ्रोतव्यं मनुष्येण परं पदमिहेच्छता ॥ १८-६-९४ (९८७५४)
एतत्पवित्रं परममेतद्धर्मनिदर्शनम् ।
एतत्सर्वगुणोपेतं श्रोतव्यं भूतिमिच्छता ॥ १८-६-९५ (९८७५५)
कायिकं वाचिकं चैव मनसा समुपार्जितम् ।
तत्सर्वं नाशमायाति तमः सूर्योदये यथा ॥ १८-६-९६ (९८७५६)
अष्टादशपुराणानां श्रवणाद्यत्फलं भवेत् ।
तत्फलं समवाप्नोति वैष्णवो नात्र संशयः ॥ १८-६-९७ (९८७५७)
स्त्रियश्च पुरुषाश्चैव वैष्णवं पदमाप्नुयुः ।
स्त्रीभिश्च पुत्रकामाभिः श्रोतव्यं वैष्णवं यशः ॥ १८-६-९८ (९८७५८)
दक्षिणा चात्र देया वै निष्कपञ्चसुवर्णकम् ।
वाचकाय यथाशक्त्या यथोक्तं फलमिच्छता ॥ १८-६-९९ (९८७५९)
स्वर्णशृङ्गीं च कपिलां सवत्सां वस्त्रसंवृताम् ।
वाचकाय च दद्याद्धि आत्मनः श्रेय इच्छता ॥ १८-६-१०० (९८७६०)
अलङ्कारं प्रदद्याच्च पाण्योर्वै भरतर्षभ ।
कर्णस्याभरणं दद्याद्धनं चैव विशेषतः ॥ १८-६-१०१ (९८७६१)

भूमिदानं समादद्याद्वाचकाय नराधिप ।
भूमिदानसमं दानं न भूतं भविष्यति ॥ १८-६-१०२ (९८७६२)
शृणोति श्रावयेद्वाऽपि सततं चैव यो नरः ।
सर्वपापविनिर्मुक्तो वैष्णवं पदमाप्नुयात् ॥ १८-६-१०३ (९८७६३)
पितॄनुद्धरते सर्वानेकादशसमुद्भवान् ।
आत्मानं ससुतं चैव स्त्रियं च भरतर्षभ ॥ १८-६-१०४ (९८७६४)
दशांशश्चैव होमोपि कर्तव्योत्र नराधिप ।
इदं मया तवाग्ने च प्रोक्तं सर्वं नरर्षभ ॥ ॥ १८-६-१०५ (९८७६५)

इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां हरिवंशोक्तभारतश्रवणविधावध्यायः ॥ स्वर्गारोहणपर्व सम्पूर्णम्॥ १८ ॥ श्रीमन्महाभारतं सम्पूर्णम्॥

इदं स्वर्गारोहणपर्व कुम्भघोणस्थेन TI.Ar कृष्णाचार्येण TI.Ar व्यासाचार्येण च मुम्बय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८३२ सन १९१०. अनेन मुद्रणेन श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवः प्रीयताम् ।

Mahabharata - SwargarohaNa Parva - Chapter Footnotes

१८-६-१क्ष् यद्यप्ययध्यायो दाक्षिणात्यकोशेषु क्वापि न दृश्यते तथापि "भगवन्नित्यादिः पलाध्यायो व्यासेन हरिवंशान्ते उक्तः अत्र श्रोतृप्ररोचनार्थमुक्त" इति नीलकण्ठीयव्याख्यानोक्तप्रयोजनायैवास्माभिरपीह स्थापितः ॥

Please send corrections to sanskrit@cheerful.com
Last updated October 14, 2013
http://sanskritdocuments.org